No. १२९६

Title अभिधा विचारः

Author ×

Extent 6 Age ×

Subject न्याय वैशेषिकं

अभिधाविचारः

१२५६

नं. १२५६

न्यायेत्रसिद्धावादः

११०

अभिधा॰वा॰ ॥ श्रीगणेशाय नमः ॥ शाब्दसमवेतमभिधाभिधं पदार्थान्तरं लिङर्थः ॥ प्रवर्त्तनात्वेन तज्ज्ञानस्यैव
शाब्दाधीनप्रवृत्तौ हेतुत्वात् । तथा हि प्रवृत्तिसामान्ये नेष्टसाधनताज्ञानस्य हेतुतासंभवः । तद्धि
नापि राजाज्ञादितोऽपि राजा मामत्र प्रवर्त्तयतीत्यवगत्य प्रवृत्तेरिति स्वतः प्रवृत्तावेव तद्धेतुता ।
पराधीनप्रवृत्तौ तु प्रवर्त्तनाज्ञानमेव हेतुः । तयोश्च तदधीनतत्क्रीयागोचरप्रवृत्तित्वात् । तद्ध
र्मिकतत्क्रियाप्रवर्त्तनात्वावच्छिन्नप्रकारकज्ञानत्वाभ्यां कार्यकारणभावः । प्रवर्त्तनात्वं च प्र
वृत्त्यनुकूलव्यापारत्वं अभिधाराजादिसाधारणं । दुर्गेलंघनादिप्रवर्त्तकराजाज्ञादिज्ञाना
त् पाकादौ प्रवृत्त्यनुदयात् । विशिष्य क्रियानिवेशः । पुरुषान्तरं प्रवर्त्तयतीति ज्ञानात् प्रवृत्त्या
पत्तिवारणाय स्वीयत्वं प्रवृत्तिविशेषणं देयं । एवं भव एवं कर्त्तव्यं इत्यादिराजाज्ञादितोप्यप्र
वृत्तिवारणाय तत्कालीनत्वमपि निवेशनीयं । एवं च वेदस्थले राजादिवत् स्वतन्त्रस्यैव   शिवः

ङ्कुरभावात्सएवतद्वत्प्रवर्त्तकः तदधीनगोचरप्रवृत्तौविधिर्मांयागेप्रवर्त्तयतीत्याकार
कंशाब्दधर्मिकस्वप्रवृत्त्यनुकूलव्यापारत्वेनाभिधाज्ञानमेवहेतुः।नचतत्रवेदेनप्रवर्त्त
कत्वमुपेयतेअपितुतदुच्चारणद्वारातद्वक्तुरेवयत्रचमौनिलिखितवेदात्प्रवृत्तिस्त
त्रापिलिपिद्वारालेखकएवराजादिवत्प्रवर्त्तकः।तथाचतद्धर्मिकतद्व्यापारत्वज्ञानादे व
वयागादौप्रवृत्तिरस्तुकिमभिधाज्ञानस्यप्रवर्त्तकत्वेनेतिवाच्यंवेदवक्तुरज्ञानेपिवेद
स्यज्ञानात्प्रवृत्तेरानुभविकत्वात्।नचाभिधायामानाभावःशंकनीयःशाब्दव्यापारतये
वतस्याःसिद्धेः।नचशाब्दज्ञानादिरूपव्यापारेणान्यथासिद्धिः।यत्त्वभिन्नसमवेतयत्का
र्यंप्रतिकारणंतत्तत्कार्यानुकूलव्यापारसमवायितेदुलविक्लित्यादिकारणंतदनुकूल
तंडुलदहनसंयोगाद्याश्रयदहनादिवदितिनियमेचानुमित्यादिकारणव्याप्तिज्ञानादौ

अभि·धा·वा· व्यभिचार इति वाच्यं। शब्दः प्रवृत्त्यनुकूलव्यापारसमवायी प्रवृत्तिकारणद्रव्यत्वात् परस
२ मवेतकार्यजनकद्रव्यत्वाद्वा आत्मवदित्यनुमानात् शब्दसमवेतव्यापारसिद्धेः। भट्टमते
2 शब्दस्य द्रव्यतया द्रव्यत्वघटितहेतोर्न तत्रासिद्धिः। अभिधायां शब्दभावनात्वेन विधिप्र
त्ययस्य शक्तिः। शब्दभावनात्वं शब्दनिष्ठोत्पत्त्यनुकूलव्यापारत्वं तादृशरूपेणोपस्थितो
ब चोत्पाद्याकांक्षायां पुरुषप्रवृत्तिरूपकर्मणो भावनांतर्गतोत्पत्तावन्वयः॥ तदुक्तं लिङोभि
धा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिरिति। एतावतैव प्रवर्तनात्वेनाभिधाज्ञा
ननिर्वाहः ननु प्रवर्तनात्वेन शक्त्यंतरं कल्प्यते प्रयोजनाभावात्। अथाकांक्षासत्वेपि श
ब्दानुपस्थितायाः प्रवृत्तेः भाव्यत्वेन कथमन्वयः भट्टमतेपि शब्दानुपस्थितस्यार्थस्य श
ब्दजन्यबोधेऽभानात्। नचार्थभावनाया आख्यातसामान्यार्थतया लिङ एव तदुपस्थिते २

रेकपदोपात्तत्वरूपप्रत्यासत्त्याकृतिवर्त्तमानत्वयोरिवभावनयोरपिपरस्परमन्वये
नैवशब्दभावनायाःप्रवर्त्तनात्वलाभइतिवाच्यं। मीमांसकमतेचेतनरथादिरूपकर्त्तृ
निष्ठव्यापारसाधारणव्यापारत्वरूपेणैवार्थभावनाया आख्यातसामान्यशक्यत्वात्।प्रव
र्त्तित्वावच्छिन्नस्यऽसामान्यशक्यलभ्यतयात्तेनरूपेणप्रवृत्तिविषयकस्यप्रवर्त्तकज्ञान
स्यानिर्वाहादितिप्रवर्त्तनात्वरूपेणापिशक्तिकल्पनमावश्यकं।शब्दप्रवर्त्तनात्वंभावना
त्वज्ञानानुकूलाप्यपराशक्तिर्लिङ्पदएवेत्यभिहितवतोमिश्रचरणस्याभिमतमेत
दिति।तन्न।प्रवर्त्तनात्वस्यप्रवृत्तिभावनात्वरूपतयात्तेनरूपेणशक्तौतयैवप्रवर्त्तनात्वा
न्तर्गततयाभावनात्वमानसिद्धोभावनात्वरूपेणशक्त्यसिद्धेर्मिश्रग्रंथविरोधानुद्धारात्
।प्रवर्त्तनात्वेनोपस्थितौतस्याएवभावोपरक्तभावनाविषयतयाभाव्याकांक्षानुदये

अभिधा॰वा॰ नकिंभाव्यमित्याकांक्षायांपुरुषप्रवृत्तेर्भाव्यत्वेनान्वयइतितत्सिद्धांतभंगप्रसंगाच्च।एतेन

२ नभावनात्वज्ञानानुकूलाशक्तिरित्यत्रभावनात्वेनार्थभावनाज्ञानानुकूलासेवप्रवर्त्तना

3 त्वेनशक्तिर्नत्वपरेति।ज्ञानानुकूलसामान्यशक्तिरेवविवक्षिताइत्युक्त्यामिश्रग्रंथविरोधप

रिहारेपिननिस्तारः।एवंचप्रवृत्तित्वप्रकारकज्ञानानुरोधेनभावनायाःप्रवृत्तिरूपेणख्या

सामान्याशक्यत्वेपितेनैवरूपेणलिङस्तत्रशक्त्यंतरंकल्प्यतांसेवचशक्तिःप्रवर्त्तनात्वज्ञाना

नुकूलत्वेनमिश्रैरभिहिता।अथार्थभावनायाःप्रवृत्तित्वेनबोधोपगमेततोभाव्याकांक्षा

नुदयेनतत्रसमभिव्याहृतस्वर्गादिफलस्यभाव्यत्वेनानुपपत्तिः।नचेष्टसाधनताज्ञानस्यै

तन्मतेपराधीनप्रवृत्तावनपेक्षितत्वात्फलानन्वयेक्षतिविरहइतिवाच्यं।चैत्यवंदेत्ते

त्यादिवाक्यान्निष्फलतयावगतेचैत्यवंदनादौप्रवृत्तेरनुदयेनबलवद्द्वेषस्यप्रवृत्तिप्र २

तिबंधकतायाश्चावश्याभ्युपेयतयातत्प्रतिबंधायप्रशस्तफलजनकत्वज्ञानस्यप्रवृत्ति
जननेअभिधर्मापेक्षणात्‌प्ररोचनांगतयोपयुज्यतइत्युक्तं।अतएवाश्रुतफलेविश्वजि
दादौफलबोधकफलपदंकल्प्यते॰एवंप्रवृत्तेःसफलत्वज्ञानमभिधायांतस्यभाव्यत्वेवा
न्वयेप्यपेक्षितं।प्रवृत्तेःसफलत्वस्याभिधायाःप्रवृत्तिभावनात्वापादकतयातस्याक्तान्वयो
पयिकयोग्यतात्वात्तन्मतेऽन्वयप्रयोजकरूपस्ययोग्यतात्वात्‌।न्वार्थभावनायांनफला
न्वयेपित्वभिधायामेवतस्याश्चभावनात्वेनोपस्थितेर्भाव्यफलान्वयोपयिकाकांक्षास
त्वमेवेतिवाच्यं।शाब्दभावनायांफलस्यभाव्यत्वेनान्वयेतावतैवकिंभाव्यमित्याकांक्षानि
वृत्तिसंभवेनपुरुषप्रवृत्तेस्तत्रभाव्यतयाऽन्वयानुपपत्तेर्भाव्याचतस्याःपुरुषप्रवृत्तिरि
त्येतादृशाकारिकाविरोधापत्तेः।नचैवमभिधापितत्वेनज्ञातास्वरूपसतीवाहेतुरतिप्र

अभि·धा·वा·
४

संगात्किंनुप्रवर्त्तनात्वेनज्ञातानचनिष्फलेदुःखैकफलेवाकर्मणिसातथाज्ञातुंशक्यतेऽत्र
तोभावनात्वेनज्ञातान्चक्रियाभाव्याकस्त्वादितिसमभिव्याहृतंफलंप्रतिभावनात्वेनज्ञा
तेतिमिश्रग्रंथस्यक्रियागतमिष्टसाधनत्वेनविध्यर्थोऽपित्वभिधागतमितिग्रंथस्यचविरो
धइतिवाच्यं।तत्रभावत्वेनज्ञातेस्यनंतरंवार्थभावनातामंतर्भाव्येतिवापूरयित्वातथाज्ञातुं
शक्यतइत्यनुषंगेनान्वयमुपगम्याभिधापदस्यचाभिधान्वयिभावनापरत्वेचाविरोधो
पपत्तेर्यथाश्रुतपरत्वेउक्तानुपपत्तेरपरिहार्यत्वादर्थभावनायांफलरूपकर्मोनन्वयेभा
वनान्वयस्यैवकर्मोदिरूपांशतयाउपरक्तभावनात्वमितितत्सिद्धांतभंगाच्च।अर्थभावना
यांयागादिक्रियायाभावनात्वेनान्वयइत्यपरिज्ञातसिद्धांतस्यप्रलपितमनादेयं।अग्नि
होमाख्येयागैःस्वर्गाख्यंफलंभावयेदित्यन्वयबोधः।कर्त्तृशक्तिभावनायोग्यताचपुंस ४

एवकर्त्तृत्वेनान्वयः।एवंचस्वर्गस्यफलत्वतयायागस्यकरणतयान्वयबोधात्यागश्चौपा
दानिकस्वर्गसाधनताबोधइत्येतादृशपरीक्षादिबहुलग्रंथविरोधादर्थपदस्यप्रयो
जनार्थकतयाअर्थभावनापरंस्वर्गादिभावनापरं।नचयागादेःप्रवृत्तौफलत्वेनान्वयेप्र
वर्त्तकज्ञाननिर्वाहः क्रियायां।कृत्यसाध्यताज्ञानकालेराजाज्ञादिनोप्यप्रवृत्तेः क्रियानुकू
लप्रवृत्त्यनुकूलव्यापारत्वेनप्रवर्त्तनाज्ञानस्यैवप्रवर्त्तकत्वोपगमादितिवाच्यं।प्रवृत्तेः
क्रियानुकूलत्वेनाबोधस्याप्युपपादनव्यत्वेनसंभवादितिचेत्सत्यं।विशेषशक्त्यालिङ्प
स्थाप्यस्यप्रवृत्तित्वावच्छिन्नस्यसामान्यशक्त्यानयाभृत्तेनाभावनात्वावच्छिन्नेभेदान्वयो
पगमात्फलान्वयोपयिकाभाव्याकांक्षासंपादनीया।एवंचार्थभावनानुकूलैशक्तिद्व
यंशब्दभावनानुकूलाचैकाशक्तिरभिधाच।प्रवृत्त्यनुकूलाशक्तिरितिमिश्रोक्तशक्ति

अभि·धा·वा· चतुष्टयसंगतिः। अथ शाब्दभावनाभिधायां शक्त्यंतरकल्पनमनर्थकं भावत्वेनाभिधाबो
५ धस्य तदवच्छिन्नसामान्यशक्त्यैवोपपत्तेः तत्र लिङो विशेषशक्तिकल्पनमनर्थकं। शब्दग
5 तत्वेनाभिधाज्ञाननिर्वाहाय वरं शब्द एव शक्तिः कल्प्यतां विशिष्टलाभश्चान्वयबलादेवास्तु
। न च तावतापि शक्तिचतुष्टस्यावश्यकत्तयाभिधाग्रंथविरोध इति वाच्यं। लिङो भावनायं विशे
षशक्त्यनभ्युपगमे। अभिधाभावनामाहुरन्यामेव लिङादयः॥ अर्थात्मभावनात्वन्या सर्वाख्या
तस्य गोचर इति कारिकाविरोधस्य दुष्परिहरत्वादिति चेन्न। शाब्दभावनायां प्रवृत्तेर्भाव्यत्वे
नान्वयो व्युत्पन्नः। अर्थभावनायां च स्वर्गादिफलं यस्येति व्युत्पत्तिभेदनिर्वाहाय शक्तिभेद
स्यावश्यकत्वात्। अन्यथा व्युत्पत्तिभेदस्य शक्तिभेदनिर्वाहत्वसिद्धांतभंगप्रसंगात्। अन्य
थान्यायमतेपि सामान्यशक्त्युपस्थाप्यकृतेः साध्यतासंसर्गेणैव क्रियायामन्वयोपपत्तेः ५

।कृतिसाध्यत्वे शक्त्यंतरकल्पनानुपपत्तेः। न च फलान्वयनिर्वाहाय फलेपि शक्त्यंतरक
ल्पनाया आवश्यकत्वात् शक्तिपंचकापत्तिरिति वाच्यं। फलस्य स्वर्गादिपदादेवोपस्थि
तेः तत्र शक्तेरकल्पनात्। नैयायिकमते त्वुत्पत्तिवैचित्र्येण इष्टसाधनत्वैकदेशे इष्टे स्वर्गा
दिपदोपस्थाप्यस्य स्वर्गादेरभेदान्वयवत् भावनायामुत्पाद्यत्वसंसर्गेण तदेकदेशाउ
त्पत्तौ बाधेयत्वसंसर्गेण तदेकदेशानुकूलत्वसंसर्गेण तथाविधस्वर्गाद्यन्वयोपगमेपि
क्षतिविरहात्। किं भाव्यमिति कर्माकांक्षायाः शब्दपुरुषरूपकर्तृद्वयव्यापारात्मकभा
वनाद्वये प्रवृत्तेः। स्वर्गादिरूपकर्मद्वयान्वयवत् केन भाव्यमित्याकांक्षायां शक्तिग्रह
रूपं करणं शब्दभावनायां यागादिरूपकरणं चार्थभावनायामन्वेति। न च यागादेर्धातु
त एवोपस्थितत्वात् तदन्वयः संभवति शक्तिग्रहस्य तदनुपस्थितेः तस्य कथमन्वयबोधे

अभिधा॰वा॰ प्रवेश इति वाच्यं। शब्दकल्पनेन लक्षणया वा तदन्वयबोधस्याप्युपपादनीयत्वात्। यद्य
६ पि स्वर्गप्रवृत्त्योः कर्मत्वं यागशक्तिग्रहयोश्च करणत्वं न विधिवाक्यस्थक्रियामादाय संभ
6 वति तत्र भावनाया आख्यातार्थतया क्रियात्वविरहात् तथापि अग्निष्टोमाख्यया यागेः स्वर्गं
भावयेत् स्वर्गकामः शक्तिग्रहेण प्रवृत्तिं भावयेत् शब्द इत्येतादृशविध्यर्थविवरणवाक्ये
भावनायाः क्रियात्वात् तामादाय कर्मकरणव्यवहार इत्यवधेयं। उक्तकरणस्य च भाव
नैकदेशे उत्पत्तौ प्रयोज्यतासंसर्गेणान्वयलिङ्भावनायाः प्रवृत्त्यादिरूपायाः यागाद्य
जन्यत्वात्। न चैवं क्रियायाः फलोत्पादकत्वस्य शब्दत एव लाभात् तदेव क्रियागतं विना
नैत्याक्षिप्ततदिष्टसाधनताबोधे पीति मिश्रग्रंथासंगतिरिति वाच्यं। स्वर्गोत्पत्तौ यागाधी
नत्वस्य शब्दतो लाभेपि विशेष्यविशेषणभावे वैपरीत्येन यागे स्वर्गोत्पादकत्वबोधस्य ६

वाक्षेपादेवसंभवात्।एवंयागादिरूपक्रियाबहुवित्तव्ययायाससाध्येतिनत्रबलद्वेष
संभवेनप्रवृत्तिर्नोत्पत्तुमर्हतीतिप्रतिसंधानेनकथंशाब्दःप्रवृत्तिंभावयेदित्याकारिका
यांद्वेषविघटनेनप्रवृत्तिनिर्वाहकगोचराकांक्षायांउपस्थितेशाब्दभावनायाएकदेशप्र
वृत्त्यन्वितायामुत्पन्नोनिर्वाहत्वसंसर्गेणप्ररोचनायाःकल्पितशाब्दात्तल्लक्षणयाश्रुतशा
ब्दाद्वाउपस्थितायाअन्वयःइत्थंचयागकरणकप्रयाजादीतिकर्तव्यताकस्वर्गभावना
त्मकपुरुषप्रवृत्त्युत्पादकःशाब्दव्यापारःशक्तिग्रहकरणकस्तुत्यर्थवादोपस्थितइत्या
कारकोभिधाविशेष्यकःशाब्दबोधः।वस्तुतस्तुकामिनोविशेष्यत्वेस्वर्गकामादिपदस्य
प्रथमांतत्वानुपपत्त्याशाब्दनिष्ठव्यापारोत्पन्नोलिङ्पदस्यविशेषशक्तिःकल्प्यते।तादृ
शोत्पन्नेविशेषरूपतयाप्रवृत्तिरूपकर्मणाभानेतद्विशेष्यतयाचपुंसइतिशक्तिग्रह

नं० १२२५ ६

अथा·वी ७ करणकप्ररोचनानिर्वाह्यशाब्दव्यापाराधीनोस्तिमद्यागकरणकप्रयाजादीनिकर्त्तव्य
ताकस्वर्गभावनावान्स्वर्गकामइत्याकारकएवशाब्दबोधइतियुक्तंप्रतिभाति॥विधिज
न्यशाब्दबोधेसंबंधरूपकरणस्येतिकर्त्तव्यतायाभावनायामनुपयुक्ततयाबहवोविद्वि
षंतितेषांमिश्रादिग्रंथेनदाकांक्षान्यदर्शनेनशाब्दबोधोपयोगितयात्रपितु॥लिङोभि
धासेवचशब्दभावनाभाव्याचतस्याःपुरुषप्रवृत्तिः।संबंधबोधःकरणंतदीयंप्ररोचना
चोगतयोपयुज्यते।इतिकारिकायांतदभिधानंअर्थांतरशंकानिरासायेतिनकश्चिद्वि
रोधः।उक्तशाब्दबोधानंतरंचात्मनःस्वर्गकामनानंत्वेप्रतिसंधायविधिर्मांप्रवर्त्तयती
तिप्रतिसंधत्तेनततोयागेप्रवर्त्ततइतिवदंति॥७॥इत्यभिधाविचारः॥७

७